# শ্রীবিষ্ণুষট্পদী

{॥ শ্রীবিষ্ণুষট্পদী ॥}

অবিনযমপনয বিষ্ণো দময মনঃ শময বিষযমৃগতৃষ্ণাম্ ।

ভূতদযাং বিস্তারয তারয সংসারসাগরতঃ ॥ ১॥

দিব্যধুনীমকরন্দে পরিমলপরিভোগসচ্চিদানন্দে ।

শ্রীপতিপদারবিন্দে ভবভযখেদচ্ছিদে বন্দে ॥ ২॥

সত্যপি ভেদাপগমে নাথ তবাহং ন মামকীনস্ত্বম্ ।

সামুদ্রো হি তরঙ্গঃ ক্বচন সমুদ্রো ন তারঙ্গঃ ॥ ৩॥

উদ্ধৃতনগ নগভিদনুজ দনুজকুলামিত্র মিত্রশশিদৃষ্টে ।

দৃষ্টে ভবতি প্রভবতি ন ভবতি কিং ভবতিরস্কারঃ ॥ ৪ ॥

মৎস্যাদিভিরবতারৈরবতারবতাঽবতা সদা বসুধাম্ ।

পরমেশ্বর পরিপাল্যো ভবতা ভবতাপভীতোঽহম্ ॥ ৫॥

দামোদর গুণমন্দির সুন্দরবদনারবিন্দ গোবিন্দ ।

ভবজলধিমথনমন্দর পরমং দরমপনয ত্বং মে ॥ ৬॥

নারাযণ করুণামায শরণং করবাণি তাবকৌ চরণৌ ।

Stotram Digitalized By Sanskritdocuments.org

ইতি ষটপদী মদীয়ে বদনসরোজে সদা বসতু ॥ ৭॥

॥ ইতি শ্রীমদ্ শঙ্করাচার্যবিরচিতং বিষ্ণুষটপদীস্তোত্রং সম্পূর্ণম্ ॥

Encoded and proofread by Sorin Suciu aka SeSe at sorins at hotmail.com.

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Vishnu Shatpadi Lyrics in Bengali PDF
% File name : vishnu6padi.itx
% Location : doc_vishhnu
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Sorin Suciu aka SeSe at sorins at hotmail.com
% Proofread by : Sorin Suciu aka SeSe at sorins at hotmail.com
% Latest update : August 28, 2010
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website